Postal Regd.No. GAMC- 1553/2025-2027

ISSN 2454-6313

संस्कृत-

# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्कः : २३६
डिसेम्बर - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्




### कालम् अतितरन्ति ते

अस्माकं पण्डिताः वदन्ति – 'कापि घटना कालबाह्या न भवति।' अर्थात् यदि कालः नास्ति तर्हि कस्याश्चित् घटनायाः कल्पनां कर्तुं न शक्यते। परन्तु अत्र प्रश्नः जायते यत् एतं नियमं ज्ञातुं कालस्य ज्ञानम् आवश्यकम् ? यः कालम् एव न जानाति तस्य विषये पण्डिताः किं वदिष्यन्ति ? कालः कालस्य ज्ञानं च भिन्नम् एव ननु । प्रायः पशवः भूतकालं वर्तमानकालं भविष्यकालं च न जानन्ति। तेषां तु सर्वे कालाः समानाः एव। ते अज्ञानतः इव वर्तमानेन एव जीवन्ति । केचन जन्तवः अपवादेन समयं किञ्चित् अवगच्छन्ति । परन्तु एषा क्षमता मनुष्यस्य मस्तिष्के प्रकृत्या हि अन्विता भवति। अतः मनुष्यः कालबोधं प्राप्नोति।

परन्तु एषः नियमः अपि अपवादरहितः नास्ति। अर्थात् प्रत्येकं मानवमस्तिष्के 'नेचरल सेन्स ओफ टाईम' भवति एव इति दृढतया वक्तुं न शक्यते। अयम् अपवादः ब्राझिलदेशस्य एमेझोनवने लभ्यते। अत्र एमोनदावा इति आदिमानवाः वसन्ति। तेषां जीवनप्रवाहे समयनामकं किमपि तत्त्वं नास्ति। ते समयं न जानन्ति। अहोरात्रस्य बोधम् अपि ते जनाः केवलं प्रकाशान्धकारयोः भेदेन प्राप्नुवन्ति। अतः एव तेषां वाग्व्यवहारे सप्ताहः, पक्षः, मासः, वर्षम्, ह्यः, श्वः इत्यादयः शब्दाः न दृश्यन्ते।

यदि समयस्य अस्तित्वं नास्ति तर्हि व्यावहारिकजीवने प्रयुज्यमानाः वार्तालापस्य विषयाः अपि भिन्नाः एव भवन्ति। बहुविधानि वाक्यानि ते वक्तुम् एव न शक्नुवन्ति। वयं समयम् उद्दिश्य वदामः – 'अहं परीक्षार्थं पूर्वसज्जतां करोमि।' 'तत्र विना विलम्बं पूर्वमेव प्राप्तव्यम्।' 'किञ्चित् प्रतीक्षां कुर्मः।' एतादृशेषु प्रयोगेषु 'समय' शब्दः न वर्तते। तथापि समयस्य कल्पना विद्यते एव । अतः एतादृशेषु प्रयोगेषु असमर्थाः भवन्ति एमोनदावाजनाः । तत्त्वज्ञानम् आश्रित्य वयं वक्तुं शक्नुमः यत् तेषां जनानां जीवने समयस्य बन्धनं नास्ति।

नगरजीवनस्य स्पर्शं न प्राप्तवन्तः एते आदिमानवाः समयं न जानन्ति, अतः दुःखिताः स्युः इति कदापि न चिन्तनीयम्। ते सुखेन जीवन्ति। उत्तमाय जीवनाय समयस्य ज्ञानम् अनिवार्यं नास्ति।

# बुद्धिमत्ता

रत्नाकरः नन्दनपुरे कश्चन महावणिक् आसीत्। तस्य अद्वितीयः पुत्रः अजितसेनः। चित्रावतीनगरस्य धनाढ्यस्य पुत्री शीलवती गुणवती सुन्दरी बुद्धिमती च। एतां वार्तां ज्ञातवान् रत्नाकरः तां स्नुषात्वेन गृहम् आनीतवान्। अजितसेनः पत्न्याः बुद्धिमत्तायाः सौन्दर्यस्य च विषये गर्वं वहति स्म। किन्तु रत्नाकरः चिन्तयति स्म यत् स्नुषायाः बुद्धिमत्ता परीक्षणीया इति।

कदाचित् मध्यरात्रे शीलवती रिक्तं घटं स्वीकृत्य गृहात् निर्गता, दीर्घकालानन्तरं रिक्तहस्ता प्रत्यागता च। एतत् दृष्ट्वा रत्नाकारः अचिन्तयत् यत् एषा साहसिनी अस्ति, स्वीयैः साहसकृत्यैः उभयोः अपि कुलयोः कीर्तिं नाशयितुम् अर्हति इति। अतः सः अनन्तरदिने पुत्रम् असूचयत् – ''वत्स! कानिचन दिनानि पत्नीं भवान् मातृगृहं प्रति प्रेषयतु'' इति।

अजितसेनः पत्न्याः प्रेषणे सहमतः न आसीत्। अतः सः एतद्विषये आसक्तिं न प्रदर्शितवान्। पितुः विरोधम् अपि न कृतवान्। अतः मया एव एतत्कार्यं करणीयम् इति सङ्कल्प्य रत्नाकरः स्नुषया सह तस्याः मातृगृहं प्रति प्रस्थितवान् एव। मध्येमार्गं काचित् नदी प्राप्ता। रत्नाकरः स्नुषाम् असूचयत् यत् पादरक्षां हस्तेन गृहीत्वा नदीं क्रामतु इति। किन्तु शीलवती तु पादरक्षां धृत्वा एव नदीं क्रान्तवती। एतस्मात् रत्नाकरः यद्यपि असन्तुष्टः जातः, तथापि मौनेन स्थितवान्।

किञ्चिद्दूरं गमनानन्तरं फलसमृद्धं किञ्चन क्षेत्रं दृष्टम्। तत् दृष्ट्वा रत्नाकरः अवदत् –''अत्र फलसमृद्धिः उत्तमा अस्ति। अतः एतस्य क्षेत्रस्य स्वामी एतस्मिन् वर्षे महान्तं लाभं प्राप्स्यति'' इति।

''उपभोगानन्तरम् अवशिष्यते चेदेव खलु लाभस्य प्रसक्तिः'' इति अवदत् शीलवती।

एतत् श्रुत्वा रत्नाकरः अचिन्तयत् – 'एषा विना चिन्तनम् उत्तरं ददाति। एषा कथं वा बुद्धिमतीत्वेन निर्देशम् अर्हेत्?' इति। किञ्चित् अग्रे यदा गतं तदा किञ्चन नगरं प्राप्तम्। तस्य नगरस्य सौन्दर्यं दृष्ट्वा रत्नाकरः साश्चर्यम् अवदत् – ''अहो! एतस्य नगरस्य सौन्दर्यम्!'' इति। ''शत्रवः यावत् आक्रमणं न कुर्युः तावत्'' इति अवदत् शीलवती।

किञ्चिद्दूरं यदा गतं तदा श्रान्तेः निवारणाय रत्नाकरः कस्यचित् वटवृक्षस्य अधः उपाविशत्। शीलवती तु ततः दूरे उपविष्टवती। 'एषा स्वभावेन दुष्टा एव। महान् अहङ्कारः एतस्याः। ज्येष्ठानां व्यवहारे अनादरः अपि एतस्याः। मातृगृहे एतस्याः त्यागः एव श्रेयसे' इति अचिन्तयत् रत्नाकरः।

एतदनन्तरं तौ कञ्चित् वृषभशकटम् आरुह्य कञ्चित् ग्रामं प्राप्तवन्तौ। कस्यचित् दयालोः गृहे ताभ्यां भोजनं कृतम्। भोजनानन्तरं रत्नाकरः शकटे शयितवान्। शीलवती शकटस्य छायायाम् उपविष्टवती। तदवसरे वृक्षस्थः कश्चन काकः काकारवम् अकरोत्। तं श्रुत्वा शीलवती अवदत् ''अये काक! किमर्थम् एवं रट्यते? मया कृतस्य एकस्य कार्यस्य कारणतः एव गृहं त्यक्तव्यम् अभवत्। अपरः दोषः यदि क्रियेत तर्हि पतिमुखदर्शनभाग्यम् अपि विलुप्येत'' इति।

एतत् श्रुत्वा रत्नाकरः आश्चर्यान्वितः जातः। सः स्नुषायाः समीपं गत्वा अपृच्छत् –''इदानीं भवती यत् उक्तवती तस्य किं तात्पर्यम्?'' इति।

''आर्य। किम् अहं वदानि? मधुराणि वचनानि उच्यन्ते इत्यतः एव शुकः पञ्जरबन्धं प्राप्नोति। तथा अस्ति ममापि दशा। विशेषगुणः एव मम हानये जातः। अहं पशुपक्षिणां कथनम् अवगन्तुं शक्नोमि'' इति अवदत् शीलवती।

'मम स्नुषा एषा विकलमतिः इति भाति' इति अचिन्तयत् रत्नाकरः।

तावता शीलवती एव पुनः अवदत् –“केभ्यश्चित् दिनेभ्यः पूर्वं रात्रिकाले कश्चन शृगालः उच्चैः अवदत् यत् नद्याम् आभरणसहितः शवः प्लवते इति। एतत् श्रुत्वा अहं रिक्तं घटं गृहीत्वा नदीतीरं गता। शवं नदीतः बहिः आनीय आभरणानि घटे पूरयित्वा शवः शृगालाय अर्पितः, घटः भूमौ निखातः च। एतत् कार्यं भवति सन्देहम् अजनयत्। तस्य फलम् इदानीम् अनुभवामि” इति। एतत् श्रुतवतः रत्नाकरस्य मनः खिन्नं जातम्। स्नुषायाः विषये दया उत्पन्ना। तावता शीलवती पुनरपि कथनम् अनुवर्तितवती “पशुपक्षिषु मद्विषये महती प्रीतिः। एषः काकः पुनः पुनः वदति यत् एतस्य वृक्षस्य अधः निधिः अस्ति इति।” रत्नाकरः झटिति एव वृक्षस्य अधः अखनत्। तस्मात् तेन निधिः प्राप्तः। एतस्मात् स्नुषाविषये रत्नाकरस्य आदरः समुत्पन्नः। सः शीलवतीम् अवदत् – “वत्से! मया भवत्याः विषये अन्यथाभावः प्राप्तः आसीत्। एतदर्थम् अहं खिन्नः अस्मि। इतः परं गृहम् एव गच्छाव” इति।

प्रतिप्रयाणम् आरब्धम्। मार्गे पुनरपि सः एव वटवृक्षः प्राप्तः, यश्च गमनसमये दृष्टः आसीत्। रत्नाकरः स्नुषाम् अपृच्छत् “भवती गमनसमये किमर्थं वटवृक्षस्य अधः न उपविष्टवती?” इति। शीलवती अवदत् – “वटवृक्षस्य कोटरे सर्पाः भवन्ति। वृक्षस्य उपरि उपविष्टाः पक्षिणः विष्ठां पातयन्ति अपि। अतः मया तत्र न उपविष्टम्” इति।

“युक्तम् उच्यते भवत्या” इति अवदत् रत्नाकरः। एतदनन्तरं नगरं प्राप्तम्। तदा शीलवती अवदत् – “एतस्मिन् नगरे यात्रिणां वासाय एका अपि धर्मशाला नास्ति। अतः विशेषप्रयत्नं विनैव शत्रवः एतत् नगरं वशीकर्तुम् अर्हन्ति” इति। एतदनन्तरं फलसमृद्धं क्षेत्रं प्राप्तम्। तत् दृष्ट्वा शीलवती अवदत् – “एतस्य क्षेत्रस्य स्वामी धान्यं विक्रीय धनस्य सदुपयोगं चिन्तयिष्यति चेदेव लाभं प्राप्तुम् अर्हति” इति। पुनरपि किञ्चिद्दूरं यदा गतं तदा लघुनदी प्राप्ता। तां दृष्ट्वा शीलवती अवदत् – “नद्यां शिलाः भवन्ति, जन्तवः चापि। अतः नदीतरणसमये पादरक्षाधरणं वरम्” इति।

स्नुषायाः बुद्धिमत्तां प्रशंसन् गृहम् आगतः रत्नाकरः गृहस्य उत्तरदायित्वं स्नुषायै अर्पितवान्। एतस्मात् अजितसेनः अवगतवान् यत् मम पत्नी पितुः विश्वासं सम्पादितवती अस्ति इति। तस्मिन् काले तस्य देशस्य राजा नूतनस्य मन्त्रिणः नियुक्तिं कर्तुम् इच्छति स्म। अतः सः देशस्य बहून् मेधाविनः मेलयित्वा समालोचनम् अकरोत्। मन्त्रिनियुक्तिविषये गोष्ठी आयोजिता। आसक्तानां परीक्षा अपि आरब्धा। तदवसरे अजितसेनः पत्न्या सह राजधानीं गतवान्। धर्मशालायां वासव्यवस्थां कृत्वा राजास्थानं गतवान् च।

तत्र राजा सर्वान् मन्त्रिस्थानापेक्षिणः अपृच्छत् – “यः राजानं ताडयति तस्य कीदृशः दण्डः?” इति।

सर्वे मेधाविनः राज्ञः प्रशंसां प्राप्तुम् इच्छन्तः अवदन् यत् सः कठोरतया दण्डनीयः इति। कश्चित् अवदत् – ‘तस्य शिरश्छेदः एव करणीयः’ इति। अजितसेनः क्षणकालम् एतत्सर्वं लक्षितवान्। ततः विना शब्दम् उत्थाय धर्मशालां गत्वा शीलवतीं राज्ञः प्रश्नम् अश्रावयत्। शीलवती अजितसेनम् अवदत् – “राजानं प्रहर्तुं कः समर्थः? शृङ्गारचेष्टासमये राज्ञी प्रहरेत्, लालनसमये पुत्रो वा प्रहरेत्। एतस्य प्रतिस्पन्दरूपेण अधिकप्रीतिप्रदर्शनम् एव युक्तम्” इति। अजितसेनः झटिति राजास्थानम् आगतवान्। तावता अपि जनाः विविधानाम् उत्तराणां दाने एव मग्नाः। सर्वे यदा मौनम् आश्रितवन्तः तदा अजितसेनः उत्थाय अवदत् – “महाराज! राजानं यः प्रहरति तस्मिन् अधिका प्रीतिः प्रदर्शनीया” इति। सन्तुष्टः राजा अजितसेनम् एव मन्त्रिपदे नियुक्तवान्। एतदनन्तरम् अजितसेनः पत्न्याः शीलवत्याः साहाय्येन योग्याः सूचनाः यच्छन् मेधाविमन्त्रिरूपेण ख्यातः जातः।

## अभिज्ञानशाकुन्तलम् ( ग्रन्थपरिचयः )

✍ व्योम शाहः

कविकुलगुरुणा कालिदासेन कलितेऽभिज्ञानशाकन्तुलाभिधे नाटके एतावताऽस्माभिः दृष्टं यत् मृगयार्थं मृगम् अनुधावन् दुष्यन्तः वैखानसेन कण्वशिष्येण बोधितः। ततः वैखानसस्य अनुरोधं मनसिकृत्य सः पुण्याश्रमं गतः। तत्र प्रच्छन्नस्थेन तेन पूर्वं प्रियंवदानसूयाशकुन्तलानां परस्परं संलापः श्रुतः। ततः भ्रमरेण बाधिता शकुन्तला रक्षिता दुष्यन्तेन। क्रमशः तासाम् आतिथ्यं स्वीकृतं मिथश्च परिचयः जातः।

कण्वर्षिस्तु ब्रह्मचारी अवर्तत, कथं शकुन्तला तस्य दुहिता इति जिज्ञासया राजा सख्यौ अपृच्छत्। अनसूयया वृत्तान्तः कथितः – कदाचित् उग्रं तपः कुर्वते कौशिकराजर्षये शङ्कितैः देवैः मेनका नियमभङ्गार्थं प्रेषिता। वसन्तकाले तयोः योगेन जनिता शकुन्तला। तदैव राजा तस्याः रूपं स्तौति –

**मानुषेषु कथं नु स्यादस्य रूपस्य सम्भवः। न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥**

शकुन्तलायै अनुरूपः वरः मृग्यते। शकुन्तला प्रस्थातुम् उत्थिता। तां वारयितुं दुष्यन्तः उत्तिष्ठति किन्तु ततः वारयति आत्मानम्। प्रियंवदा तां वारयति। अङ्गुलीयं प्रदाय राजा शकुन्तलाम् अनृणां कुरुते। मध्ये प्रियंवदा तम् अङ्गुलीयं गृहीत्वा राज्ञः नाम्नः अक्षराणि वाचयति। अथ सैनिकाः तपोवनं समागताः दुष्यन्तस्य च तत्र उपस्थितिम् उद्घोषयन्ति। सख्यः अनुज्ञां स्वीकृत्य गच्छन्ति। नगरं गन्तुं मन्दोत्साहः राजा अपि निर्गच्छति। अनेन च प्रथमाङ्कस्य समाप्तिः भवति।

द्वितीयाङ्कस्य प्रारम्भे विदूषकवचनेन सूच्यते यत् शकुन्तला राज्ञः मनोज्ञा जाता। पुनः राजा इदानीं विरहवेदनाम् अनुभवति। मृगयाऽपि इदानीं न तस्य चित्तं रमयति। सः भद्रसेनाभिधाय सेनापतये आदिशति यत् सैनिकैः तपोवनं न रोद्धव्यं दूराच्च परिहर्तव्यम्। विदूषकः पुनःपौन्येन कथयति शकुन्तलां 'तपस्विकन्यका' इति कथयति। दुष्यन्तः प्रतिवदति – "न परिहार्ये वस्तुनि दुष्यन्तस्य मनः प्रवर्तते" – अनेन पुनः शकुन्तलायाः तपस्विकन्यात्वं न इति सूचितम्। शकुन्तलायाः मनोहरं रूपम् अग्रे तेन सूचितम्। विदूषकेन शकुन्तलायाः चित्तरागे पृष्टे तेन तत्र आश्रमपदे शकुन्तलायाः तस्य (दुष्यन्तस्य) पुरतः लज्जा–हासादिशीलात्मिका प्रणयप्रकाशिका वृत्तिः प्रदर्शिता दुष्यन्तः पुनरपि आश्रमपदं गन्तुकामः।

अथ दौवारिकेन ऋषिकुमाराणाम् आगमनं सूचितम्। प्रणामाभिवादनपूर्वकम् ऋषिभिः सूचितं यद् राक्षसैः तपोवने विघ्नः उत्पाद्यते। अतः सारथिद्वितीयेन राज्ञा आश्रमपदम् अलङ्करणीयम् इति निवेदनम्। राजा सहर्षं स्वीकृत्य दौवारिकाय रथसज्जार्थम् आज्ञां कुरुते। ऋषिकुमारौ निश्चिन्तौ कृत्वा राजा तौ प्रतिप्रेषयति। राज्ञः प्रस्थानकाले करभकः अन्तःपुरात् आगतः। तेन महिषीणां पुत्रपिण्डपालनसम्बद्धस्य उपवासस्य सन्देशः राज्ञे कथितः। द्वयोरपि अनतिक्रमणीयकार्ययोः किञ्चिद् विचार्य राज्ञा पुत्रपिण्डपालनार्थं विदूषकः नियुक्तः स्वयं च तपोवनस्य रक्षार्थं प्रस्थितः। प्रान्ते दुष्यन्तस्य मनसि चिन्ता वर्तते यद् विदूषकः न आश्रमसत्कवार्ताम् अन्तःपुरे कथयेत्। अतः विशेषेण तस्मै "सखे माधव्य! ऋषिगौरवाद् आश्रमपदं गच्छामि। न खलु सत्यमेव तापसकन्यायामभिलाषो मे। पश्य –

**क्व वयं क्व परोक्षमन्मथो मृगशावैः सह वर्धितो जनः। परिहासविकल्पितं सखे परमार्थेन न गृह्यतां वचः॥"**

इति कथयित्वा निर्गच्छति। अनेन च द्वितीयाङ्कस्य समाप्तिः भवति।

(क्रमशः...)

## मासवार्त्ताः

### आयोजयिष्यते संस्कृत-लिटरेचर-फेस्टिवलकार्यक्रमः ।

एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानम्, श्रीदिव्य-जीवन-सांस्कृतिक-सङ्घः (शिवानन्द-आश्रमः) संस्कृत-साहित्य-अकादमी इत्येतेषां संयुक्तोपक्रमेण अमदावादनगरे शिवानन्द-आश्रमे संस्कृत-लिटरेचर-फेस्टिवलकार्यक्रमस्य आयोजनं भविष्यति । डिसेम्बरमासस्य १३, १४ दिनाङ्कयोः आयोजितेऽस्मिन् कार्यक्रमे अधोनिर्दिष्टानां विदूषां व्याख्यानानि, चर्चासत्राणि च आयोजितानि भविष्यन्ति । कार्यक्रमेऽस्मिन् सांस्कृतिककार्यक्रमा अपि भविष्यन्ति । आगच्छन्तु संस्कृतभाषायाः प्रचाराय आयोजितेऽस्मिन् विशिष्टे कार्यक्रमे उपस्थाय संस्कृतभाषायाः प्रचारकार्ये सहभागिनः भवेम।

**दिनाङ्कः - 13 डिसेम्बर, 2025 समयः - 2:00 pm to 8:30 pm**


स्वामी अक्षयानन्दः सरस्वती
विषयः
**न साहित्यं यन्न सानुबन्धम्**


प्रा. सुकान्तकुमारः सेनापतिः
विषयः
**संस्कृत साहित्य में जीवनमूल्य**


डॉ. भाग्येशः झा
विषयः
**संस्कृत साहित्य में आत्मबोध**


श्रीमान् प्रणवः पटेलः
विषयः
**कौटिल्य अर्थशास्त्र**


डॉ. ललितकुमारः पटेलः
विषयः
**विदुरनीतिः**


सुश्री नेहा कृष्ण कुमार
विषयः
**गीतगोविन्दरसास्वादः**

भक्तकवि-जयदेव-विरचितम्
**"गीतगोविन्दम्"**
नृत्यनाटिका

**दिनाङ्कः - 14 डिसेम्बर, 2025 समयः - 10:00 am to 8:30 pm**


डॉ. हर्षदेवः माधवः
संवादविषयः
**संस्कृत साहित्य में भक्ति**


श्रीमान् धवलकुमारः
संवादविषयः
**संस्कृत साहित्य में भक्ति**


डॉ. अमी जोशी
विषयः
**वेदों में संवाद**


श्रीमान् आशुतोषः शास्त्री
विषयः
**वेदों में संवाद**


डॉ. ऊर्मिः सत्यन् दवे
विषयः
**विवेकचूडामणिः**


डॉ. अरुणः वर्मा
विषयः
**विवेकचूडामणिः**


डॉ. दीपेशः कतिरा
विषयः
**संस्कृत-पङ्क्तियाँ जो समग्र विश्वमें गूंजी**


डॉ. शिवानी शर्मा
विषयः
**भारतीयज्ञानपरंपरा - अस्मिता, स्त्रोत एवं मूल्य**


डॉ. ज्वलन्तकुमारः शास्त्री
विषयः
**वेद का यथार्थ स्वरूप**


डॉ. महेशकुमारः पटेलः
विषयः
**भगवदज्जुकीयनाट्यरसास्वादः**

महाकवि-बोधायन-विरचितम्
**भगवदज्जुकीयम्**
नाटकम्

## कृपया हसन्तु

**माता - (पुत्रम् उद्दिश्य) किं पुनः दूरभाषं पश्यसि ?**

**पुत्रः - अम्ब ! नाहं दूरभाषं पश्यामि, अपितु दूरभाषः मां पश्यति ।**

**माता - एवं कथम् ?**

**पुत्रः - पश्यतु दूरभाषः मह्यं कथयति - "स्क्रीन-टाईम समाप्तः अधुना विश्रामं कुरु !"**

★ ★ ★ ★ ★



**पिता - (पुत्रं प्रति कोपेन) किमर्थं पुनः पुनः भोजनं याचसे ?**

**पुत्रः - तात ! अहं न याचे ।**

**पिता - तर्हि कः याचते ?**

**पुत्रः - मम उदरम् एव याचते । अहं तु केवलं सन्देशवाहकः अस्मि ।**

★ ★ ★ ★ ★

**शीतकाले माता उच्चैः पुत्रं प्रति - भोः उत्तिष्ठ रे ।**

**पुत्रः - मातः । अहं कम्बलदेशस्य नागरिकः अस्मि । देशत्यागः न शक्यः ।**

★ ★ ★ ★ ★

**रमणः - (नमनं प्रति) भोः नमन ! त्वम् अत्यन्तं बुद्धिमान् ।**

**नमनः - न मित्र । 'गूगल' एव बुद्धिमान् अहं तु तस्य दूतः ।**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**शरीरनिरपेक्षस्य दक्षस्य व्यवसायिनः ।**
**बुद्धिप्रारब्धकार्यस्य नास्ति किञ्चन दुष्करम् ॥**

**तात्पर्यम्** – शरीरचिन्तनं परित्यज्य दक्षतया निरन्तरं यः कार्यं कुर्यात्, सम्यक् विचिन्त्य च यः कार्यस्य आरम्भं कुर्यात् तेन साधयितुम् अशक्यं न किञ्चित् विद्यते।

**शस्त्रैर्हतास्तु रिपवो न हता भवन्ति प्रज्ञाहताश्च नितरां सुहता भवन्ति ।**
**शास्त्रं निहन्ति पुरुषस्य शरीरमेकं प्रज्ञा कलां च विभवं च यशश्च हन्ति ॥**


**तात्पर्यम्** – शस्त्रेण प्रहताः चेत् शत्रवः वस्तुतः हताः न भवन्ति। बुद्धिबलेन जिताः चेदेव ते वस्तुतः अपजयं प्राप्नुवन्ति । यतः शस्त्रं शरीरमात्रं विनाशयति । किन्तु बुद्धिबलं यदि नश्येत् तर्हि तदीयं धनं, कीर्तिः, प्रतिभा च विनश्यति।

**शास्त्राण्यधीत्यापि भवन्ति मूर्खाः यस्तु क्रियावान् पुरुषस्स विद्वान् ।**
**सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगम् ॥**

**तात्पर्यम्** – शास्त्राणि अधीतवन्तः जनाः अपि कदाचित् मूर्खाः स्युः । स्वीयं ज्ञानम् आचरणे यः आनयेत् सः एव वस्तुतः पण्डितः । समीचीनतया विचिन्त्य उक्तस्य औषधस्य नामश्रवणमात्रेण कोपि रुग्णः स्वस्थः न भविष्यति।

## ज्ञानसरित्

**श्यामः पटेलः**



**शृङ्गी पक्षी – कासोवरी** – राक्षसानां शिरसि पशोः शृङ्गमिव शृङ्गं शृङ्गद्वयं वा भवति इति शैशवे श्रुतं स्यात्। किन्तु न कदापि तथा लोके दृष्टम्। यदि भवद्भ्यः कथयामि यत् पक्षिणः शिरसि अपि पशुवत् शृङ्गं भवति तर्हि न भवन्तः कदापि अङ्गीकुर्युः। जानाम्यहम्। किन्तु मित्राणि ! एतत् सत्यम् अस्ति।

ओस्ट्रेलिया–देशे कासोवरी नाम कश्चन पक्षी अस्ति। यथा वयं शुकं पालयामः तथा तत्रत्याः जनाः स्वगृहे एनं पालयन्ति। शाहमृगपक्षी इव कृष्णवर्णीयः दृश्यमानोऽयम् औन्नत्ये तृतीयं स्थानं विदधाति। तस्य औन्नत्यं प्रायः ५ फीटपरिमितं भवति। तथा शरीरस्य भारः ६० किलोग्राममितः। कदाचित् तेन कारणेन एव सः आकाशे डयितुं न शक्नोति। तस्य ग्रीवा रक्तवर्णीया तथा सुदीर्घा भवति। तस्य मस्तकस्योपरि अस्थिनिर्मितम् एकं शृङ्गं भवति। कासोवरीपक्षिणः सुदीर्घे पादद्वये तिस्रः अङ्गुल्यः भवन्ति। सः प्रतिघण्टं ५० किलोमीटरमितं यावता वेगेन धावितुं शक्नोति। यदा कूर्दते तदा भूमितः ५ फीटमितं यावत् कूर्दते। भोजने सः फलानि लघुकीटांश्च एव भुङ्क्ते। स्वभावतः तु शान्तिप्रियो वर्तते किन्तु यदा खिन्नः भवति तदा कुक्कुटः इव घातं करोति। वस्तुतः ओस्ट्रेलियादेशे तस्य एतावत्याः लोकप्रियतायाः एकमात्रं कारणमस्ति तस्य कमनीयता।

शृङ्गम् – a horn, कुक्कुटः – a wild cock, कमनीयता – beauty

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **कुम्भिनी** | पृथिवी | earth |
| **सिञ्जितम्** | झनझनाहट | Tinkling |
| **लघिष्ठः** | अत्यन्त हलका | Lightest |
| **रेपः** | तिरस्करणीय | Contemptible |
| **सौराज्यम्** | अच्छा प्रशासन | Good government |
| **अव्यञ्जनः** | अस्पष्ट | Indistinct |
| **प्रचलाकी** | मोर | peacock |
| **पूलिका** | पूरी | Puri |
| **विपलायनम्** | दौड जाना | Running away |
| **शुश्रूः** | माता | mother |
| **ग्लपितः** | क्लान्त | Exhausted |
| **सदनम्** | घर | house |
| **आतरः** | दरिया की उतराई | Fare for being ferried over a river |
| **प्रत्यादानम्** | वापिस लेना | receiving back |
| **आवास्यम्** | बसा हुआ | Inhabited by |

## किं भवन्तः जानन्ति ?

**१) एतेषु कुम्भमेला कुत्र न आयोज्यते ?**

(क) नासिके (ख) उज्जैन्याम् (ग) प्रयागे (घ) नागपुरे

**२) नौचन्द्याः प्रसिद्धमेला कुत्र आयोज्यते ?**

(क) हरिद्वारे (ख) मेरठे (ग) आगरायाम् (घ) लखनऊनगरे

**३) अर्धकुम्भमेला कतिवर्षाणाम् अन्तरालैः आयोज्यते ?**

(क) ४ वर्षाणाम् (ख) ६ वर्षाणाम् (ग) १२ वर्षाणाम् (घ) १८ वर्षाणाम्

**४) महाकुम्भमेला कतिवर्षाणाम् अन्तरालैः आयोज्यते ?**

(क) ६ वर्षाणाम् (ख) १० वर्षाणाम् (ग) १२ वर्षाणाम् (घ) १८ वर्षाणाम्

**५) एतेषु का मेला जैसलमेरे आयोज्यते ?**

(क) कुम्भमेला (ख) मरुमेला (ग) नौचन्दीमेला (घ) सोनपुरमेला

**६) 'झण्डामेला' कुत्र आयोज्यते ?**

(क) कुरुक्षेत्रे (ख) चित्रकूटे (ग) कानपुरे (घ) देहरादूने

**७) प्रसिद्धपुस्तकमेला कस्मिन् प्रान्ते आयोज्यते ?**

(क) राजस्थाने (ख) गुजराते (ग) देहल्याम् (घ) मध्यप्रदेशे

उत्तराणि – (१) घ (२) ख (३) ख (४) ग (५) ख (६) घ (७) क

# अस्माकम् आगामिकार्यक्रमाः


EKLAVYA SANSKRIT ACADEMY
जयतु संस्कृतं जयतु भारतम्

**Learn Online/Offline**

## संस्कृतभाषाशिक्षणम्
### Second Level

**Date :** 11/2/2026 to 13/5/2026

**Day :** Mon-Wed-Fri

**Time :** 6.30 pm to 8.00 pm (IST)

**Fees :** 7000/-

**Venue: Satva Vatika**
**Opp Randesan Metro Station Gandhinagar**

**Contact :**
**Dr. Mihir Upadhyay - (91) 098246 16237**
**Ila Joshi +(91) 063510 34630**

EKLAVYA SANSKRIT ACADEMY
जयतु संस्कृतं जयतु भारतम्

## संस्कृतव्याकरणम्
**(Class 9 & 10)**
**Offline**

**Date :** 5/1/2026 to 15/1/2026

**Day :** Daily

**Time :** 8.00 am to 9.30 am (IST)

**Fees :** 3500/-

**Venue: Core House Ahmedabad**
**contact: Dr Mihir Upadhyay, 98246 16237**

**Learn Online**

## संस्कृतभाषाशिक्षणम्
### Second Level

**Date :** 2/1/2026 to 30/3/2026

**Day :** Mon-Wed-Fri

**Time :** 7.00 am to 8:30 am (IST)

**Fees :** 7000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

## संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10


**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।


EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006